श्रीः

श्रीमते रामानुजाय नमः

श्रीमते निगमान्तमहादेशिकाय नमः

विल्लूर् नडादूर् श्री श्रीनिधेः कृतिषु

॥ गुरुवायुपुरीश मङ्गळस्तवः ॥

This document has been prepared by

Sunder Kidāmbi

with the blessings of

श्री रङ्गरामानुज महादेशिकन्

His Holiness śrīmad āṇḍavan śrīraṅgam

श्रीः

श्रीमते रामानुजाय नमः

श्रीमते निगमान्तमहादेशिकाय नमः

॥ गुरुवायुपुरीश मङ्गळस्तवः ॥

कविताजितकल्लोलिकन्यकाकान्तवक्षसे।
करुणादिगुणाढ्याय कमलानिधये नमः॥

गुरुवायुपुरे नाथ गुरुवाग्विभवेऽथवा।
कुरुषे विहृतिं नित्यम् इति डोलायते मनः॥ 1 ॥

गुरुमरुन्मुनिबृन्दनुताङ्घ्रये
गुरुवराकृतिमस्य समेयुषे।
गुरुमरुन्नगरोत्तमवासिने
गुरुमरुत्प्रथमाय नमो नमः॥ 2 ॥

गुरुशिष्यसौम्यगुरुपूजनाश्रयं
कुरु चित्त कञ्चिदपि ते समाश्रयम्।
कुरुभीमसेनरणरङ्गभीषणं
गुरुभीमसेनगुरुपत्तनाधिपम्॥ 3 ॥

गुरुगन्धवाहनगरीविहारिणं
कुरुवंशजातविजयस्य सारथिम्।
गुरुमागमस्य परमं पुरातनं
कुरु मानसान्तरनिशं शुभाश्रयम्॥ 4 ॥

गुरुणा विनष्टनिजबालकाङ्घ्रिणा
वरुणालयान्तरवतीर्य चोदितः।

अरुणाधरं तमुपनीय यो ददौ
करुणारसौघभरितं तमाश्रये ॥ 5 ॥

श्रीजीवमारुतपुराधिप युष्मदीया
दृष्टा मया प्रतिकृतावपि दिव्यमूर्तिः।
शान्ता गभीरमधुरा श्रमहारिणी मां
हे जीव मा रुद इतीव किलाभिधत्ते ॥ 6 ॥

धिषणा मम विवशा स्वयमधुना विधिनेयं
कुरुते रतिमनिशं भृशमुररीकृतलास्या।
धिषणानिलनगरोत्तमतिलकायितधाम्ने
निखिलागमशिरसिस्थितपदपङ्कजभूम्ने ॥ 7 ॥

गुरुमारुतपत्तनैकधाम्ने
निगमान्तोदितनैजकीर्तिभूम्ने।
भवुकाधिकसर्वकामसीम्ने
स्पृहयत्येष सदेह कृष्णनाम्ने ॥ 8 ॥

दुर्वादिनामिह कलावपि नास्तिकानां
गर्वापनोदनविधौ पटुतां दधाने।
सर्वाभिवाञ्छितविधानसुपर्ववृक्षे
गुर्वाङ्घ्रनेयगुरुपत्तनराजि लीये ॥ 9 ॥

गुरुगन्धवाहनगरीविहारिणे
करवै नमांसि मम चित्तहारिणे।
निजपादभक्तशुभसङ्गकारिणे
करुणां रमां च हृदि नित्यधारिणे ॥ 10 ॥

हृदय सती गतिरिष्टा तव चेत्
शृणु मम गिरमतिहितसृति लग्नाम्।

कुत रतिमिह सुरनुततिततिमहिते
धिषणसमीरणपत्तननाथे ॥ 11 ॥

जीव किमेभिर्यत्नैः
जीवनमात्रेऽपि नात्र पर्याप्तैः।
जीव सदाश्रित्य मुदा
जीवजगत्प्राणपत्तनप्राणम् ॥ 12 ॥

माया ते सततं तनोति ललितं मां मन्तयन्ती भवे
माया ते दयिता दयारसमयी सा मामपायात् पुनः।
मा याया इति साकमागतवती रक्षां विधत्ते परां
मायावल्गितमञ्जुमन्दहसितं मां वीक्ष्य धत्ते भवान् ॥ 13 ॥

श्रीरामानुजदर्शने जलनिधेः यास्ति स्थितिस्तादृशी
श्रीरामानुज दर्शने तव मम स्वामिन् कृपावारिधे।
श्रीरामानुजदर्शने मम रतिं संवर्धयेथास्सदा
श्रीरामानुजया तनोतु वसतिं जाया तवास्मद्गृहे ॥ 14 ॥

स्वामिन्नुद्धवपूजितामल महासौन्दर्यपूर्णाकृते
श्रीमन्नुद्धवतां विलोचनवतां नित्यं किलात्राश्रित।
अस्माकं भवदङ्घ्रिसक्तमनसां हे प्राणभूत प्रभो
श्रीवाचस्पतिगन्धवाहनगरीवासास्तु तुल्यं नमः ॥ 15 ॥

गोदाचिन्तनतस्सदा खलु भवान् तत्त्वं गतो वर्तते
गोदाकारयुतो ददाति यदितो गामीदृशीं मादृशे।
गोदाया हि वरं वरं घटयतात् स्वामिन् सुताया मम
गोदानौघफलं सकृत्किल भवत्सञ्चिन्तनं सौति नः ॥ 16 ॥

पीताम्बरं धृतवता पुरुषोत्तमेन
गीतां परेण भवता भवतापहन्त्रीम्।

गीतां परेण समरे न तथाविधेऽपि
नीतां परां निगमतोऽपि वदन्ति सन्तः ॥ 17 ॥

पुरा तुरङ्गाननभूमिकावान्
वेदानदास्त्वं विधये हिताय।
जातो नियन्ताथ तुरङ्गमानां
गीतामियं साधु गता परत्वम् ॥ 18 ॥

गुरुमरुद्भुजि ते सगरे पुरा
स्वजनखेदमदात् किल नर्तनम्।
गुरुमरुन्नगरे पुनरद्य तत्
निखिललोकमुदे परमेधते ॥ 19 ॥

गुरुमरुन्नगरे यदि नो रतः
गुरुमरुद्भुजि सक्त तदा तव।
गुरु न तल्पसुखं भविता ततः
गुरुमरुन्नगरे निरतस्सदा ॥ 20 ॥

गुरुहनुमद्गुरुनगरे
गुर्वीं प्रीतिं समेयुषे भवते।
उर्वीतलवैकुण्ठे
मौर्वीव नता जयं यामः ॥ 21 ॥

गुरुपङ्क्तिनिवासनिर्मलम्
हृदयं संवहता कवीन्दुना।
गुरुवायुपुरीशविंशतिः
रचिता श्रीनिधिना निधिस्सताम् ॥ 22 ॥

॥ इति गुरुवायुपुरीश मङ्गळस्तवः समाप्तः ॥